“कौमुदीकथाकल्लोलिन्याः (उत्तरार्द्धस्य) व्याकरणात्मकदृष्ट्या समीक्षात्मकमध्ययनम्”

संस्कृतविषये पी–एच. डी. इति
उपाधिहेतवे प्रस्तुतशोधप्रबन्धस्य
प्रस्तावितरूपरेखा
(2019)

शोधार्थी
गौरव कुमार गौतमः
संस्कृतविभागः, डी.ई.आई.

शोधनिर्देशक :

डॉ० अभिमन्युः
असि० प्रो०. संस्कृतविभागः
कलासंकायः, डी.ई.आई.

संस्कृतविभागः, कलासंकायः
दयालबाग–शिक्षण–संस्थानम् (डीम्ड यूनिवर्सिटी)
दयालबाग़, आगरा–282005

"व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम्" कस्यापि शब्दस्य प्रकृतिप्रत्यययोः ज्ञानाय व्याकरणमावश्यकम्। मानवजीवने व्याकरणस्य अतीव महत्वं वर्तते। व्याकरणेनैव मनुष्यः शुद्धाशुद्धोच्चारणस्य विवेकं करोति। व्याकरणं शब्दसंस्कारद्वारा मनः संस्कृतं परिशुद्धं च करोति। शब्दब्रह्मणः ज्ञानमपि कारयति। अथवा कस्यापि भाषायाः सम्यक् ज्ञानाय व्याकरणस्य महत्युपयोगिता भवति। सम्पूर्णसंस्कृतवांगमये व्याकरणशास्त्रस्य विशिष्टस्थानं वर्तते। प्राचीनकालादेव अस्य वेदांगेषु गणनास्ति। महर्षिपतञ्जलिना उक्तम् "प्रधानं च षट्स्वंगेषु व्याकरणम्" (महा. पश्पशाह्निक) एकस्य शब्दस्य बहवः अर्थाः भवन्ति तेषां अवगमनाय व्याकरणमावश्यकम्। उक्तमपि

"यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत्।।

व्याकरणद्वारा काव्येषु कठिनशब्दानां सरलीकरणं भवति; यथा मानवजीवने केचित् नियमाः अपेक्षिताः भवन्ति तेनैव प्रकारेण भाषायाः सुदृढ़ीकरणाय व्याकरणिकनियमानाम् आवश्यकता भवति।

व्याकरणं विना भाषायां वाक्यस्य निर्माणं न भवितुं शक्यते। यतोहि व्याकरणद्वारैव पदानां निर्माणं भवति। पदानाम् एकत्रीकरणेन वाक्यनिर्माणं भवति। वाक्यं विना साहित्यं अस्तित्वविहीनम् अस्ति। अतः महर्षिपतंजलिना उक्तम् – "अपदं न प्रयुञ्जीत"।

सम्पूर्णसाहित्यस्य सम्यगवबोधनाय व्याकरणस्य आवश्यकता भवति। व्याकरणं विना तस्य अर्थं न सम्यक्तया ज्ञातुं शक्नुमः। अतः साहित्ये अभिधा लक्षणा व्यंजना इत्येतासां ज्ञानाय अर्थावगमनाय च व्याकरणमावश्यकम्।

संस्कृतवाङ्गमये द्विविधं काव्यं समुपलभ्यते। एकं काव्यशास्त्रं अपरं शास्त्रकाव्यम्। काव्यशास्त्रं काव्यस्य नियमनं करोति एवं शास्त्रकाव्यं काव्यद्वारा शास्त्रज्ञानं कारयति। एतादृशेषु ग्रन्थेषु प्रतिनिधिरूपेण भट्टिकाव्यं, विद्वच्चरित्रपंचकः, सेतुयात्रानुवर्धनं, कथामुक्तावलिः कौमुदीकथा कल्लोलिनी च प्रमुखाः ग्रन्थाः सन्ति।

एतेषु ग्रन्थेषु श्रीरामशरणशास्त्रीविरिचता कौमुदीकथाकल्लोलिनी शास्त्रकाव्यरीत्या व्याकरणस्य ज्ञानं कारयति। ग्रन्थेऽस्मिन् एकादश कल्लोलाः सन्ति। सम्पूर्णग्रन्थस्य भागद्वयं वर्तते। पूर्वार्द्धः उत्तरार्द्धश्च। पूर्वार्द्धे पंच अध्यायाः एवं उत्तरार्द्धे षट् अध्यायाः सन्ति। ग्रन्थेऽस्मिन् कथासरित्सागरस्य सरलाः रोचकाः च कथाः आधारीकृत्य व्याकरणसिद्धान्तकौमुद्याः औणादिकप्रकरणं परित्यज्य प्रायः सम्पूर्णोदाहरणानां प्रयोगः समुपलभ्यते। ग्रन्थेऽस्मिन् सूत्राणां उदाहरणैः साकं यथास्थाने उदाहरणमाध्यमेन देशानां, पर्वतानां, नदीनां, पदार्थानां प्राकृतिकसौन्दर्यस्य महत्वं इत्यादीनां वर्णनं प्राप्यते। अत्र प्रथमेऽध्याये शिवपार्वत्योः संवादमाध्यमेन वररुचिमहाभागस्य कथा वर्णिता। एतां कथाम् आधारीकृत्य ग्रन्थकारेण सन्धिशब्दानां ज्ञानं कारितम्। द्वितीयेऽध्याये गुणाढ्यस्य कथाद्वारा कारकाणां ज्ञानं कारितम्। तृतीयेऽध्याये कौशाम्बिराज्यस्य मुख्यामात्यस्य यौगन्धरायणस्य कौशलतायाः कथाम् आधारीकृत्य स्त्रीप्रत्ययानां ज्ञानं कारितम्। चतुर्थेऽध्याये उदयनयौगन्धरायणयोः संवादकथाम् आधारीकृत्य समासतद्धितप्रत्ययानां ज्ञानं कारितम्। पंचमेऽध्याये राजाहरिवरस्य कथाम् आधारीकृत्य तद्धितद्विरुक्तशब्दानां ज्ञानं कारितं महाभागेन।

षष्ठेऽध्याये वत्सयुवराजस्य कथामं आधारीकृत्य गणानां निर्देशः कृतः। सप्तमेऽध्याये शंखदत्तस्य कथाम् आधारीकृत्य प्रक्रियाणां निर्देशः कृतः। अष्टमेऽध्याये विक्रमवेतालयोः परस्परसंवादमाध्यमेन कथानां विवरणं स्वीकृत्य कण्वादिप्रकरणस्य उदाहरणानां ज्ञानं कारितम्। नवमेऽध्याये शुकशुनकयोः संवादमाध्यमेन पद–वाच्य–लकारार्थानां निर्देशं कारितम्। दशमेऽध्याये मृगांकदत्तस्य कथाम् आधारीकृत्य प्रकीर्णप्रत्ययान् निर्दिष्टवान् ग्रन्थकारः। अन्तिमेऽध्याये नरवाहनदत्तस्य कुशलशासनस्य वैभवस्य च कथां स्वीकृत्य कृदन्तानां निर्देशः कारितः।

अतः वयं वक्तुं शक्नुमः यत् ग्रन्थाकारेण कथामाध्यमेन सरलपद्धत्या व्याकरणस्य क्लिष्टप्रकरणानां ज्ञानं कारितम्। सम्पूर्णग्रन्थम् अवलोक्य मया दृष्टं यत् ग्रन्थकारे बाणभट्टस्य तुल्यं गद्यात्मकता एवञ्च भासप्रभृतः कथासंकलनस्य कौशलः विद्यमानोऽस्ति।

प्राक्तनकार्यसर्वेक्षणम्–

"शोधगंगा" इति नाम्नः अन्तर्जाले तथा च श्रीलालबहादुरशास्त्रिराष्ट्रीयसंस्कृतविद्यापीठस्य पुस्तकालये, राष्ट्रियसंस्कृतसंस्थानस्य पुस्तकालये, दिल्लीविश्वविद्यालयस्य पुस्तकालये च अन्येषु पुस्तकालयेषु अपि अन्वेषणं कृत्वा मया प्राप्तं यत् "कौमुदीकथाकल्लोलिनी" इति ग्रन्थस्योऽपरि केवलं एकमात्रं शोधकार्यम् अभवत्। अन्यच्च तस्य विवरणं एवं वर्तते–

- "कल्लोलिन्याः समीक्षात्मक परिशीलनम्" इति, शर्मा मिथलेश कुमार, श्री रणवीर केन्द्रीय संस्कृत विद्यापीठ–शास्त्री नगर, जम्मू–1986

अस्य ग्रन्थस्य पूर्वार्द्धस्योऽपरि सम्प्रति शोधकार्यम् प्रचलन् अस्ति। यस्य विवरणम् अधोलिखितम्–

- "श्री रामशरण शास्त्री विरचित कौमुदीकथाकल्लोलिनी (पूर्वार्द्ध) का व्याकरणात्मक दृष्टि से समीक्षात्मक अध्ययन" भूपेन्द्र कुमार गौतम, (व्याकरणाचार्य) दयालबाग एजूकेशनल इन्स्टीट्यूट (डीम्ड यूनिवर्सिटी) दयालबाग, आगरा–282005

प्रविधयः– शोधप्रबन्धलेखनसमये मुख्यतः विवेचनात्मकं गवेषणात्मकं च शैल्याः प्रयोगं करिष्याम्यहम्।

विषय चयनस्यौचित्यम्–

मह्यं व्याकरणं रोचते। कथाः आधारीकृत्य व्याकरणस्य उदाहरणानि रुचिकराणि भवन्ति। कथामाध्यमेन बालानां कृतेऽपि व्याकरणस्य अध्ययनं बहुसरलं भवति। एषः ग्रन्थः कथामाध्यमेन व्याकरणस्य अध्ययनं कारयति। अतः मया एषः ग्रन्थः शोधविषयरुपेण स्वीकृतः। अन्येषां छात्राणां व्याकरणे रुच्युत्पादनमपि भविष्यति। परिणामतः पाठकवर्गः एतं ग्रन्थं सरलतया ज्ञातुं शक्नोति। यतोहि सम्प्रति अस्य ग्रन्थस्य पूर्वार्द्धभागे शोधकार्यं प्रचलन् अस्ति अतः मया उत्तरार्द्धे प्रयुक्तव्याकरणिककोटीनां विवेचनं स्वीकृतम्। व्याकरणः क्लिष्टकरः भवति। व्याकरणेऽपि क्रियापदानां, प्रक्रियानां पदवाच्यलकारार्थानां प्रयोगः वैशिष्टयकरं क्लिष्टकरञ्च भवति किन्तु कथामाध्यमेन एतेषां प्रयोगः छात्रेषु मध्ये वैविध्यपूर्णं रुचिकरं च

भविष्यति। अतः अहं शोधमाध्यमेन अस्मिन् ग्रन्थे आगतानां क्लिष्टानां पदानां विवेचनं करिष्यामि। प्रयुक्तेषु पदेषु भाषा–साहित्य–व्याकरणिक दृष्ट्या किं वैशिष्ट्यं अस्ति तस्यान्वेषणमपि करिष्यामि। मम कृते इदमपि अवधेयं वर्तते यत् अस्य ग्रन्थस्य पूर्ववर्त्युत्तरवर्ती प्रभावः कीदृशः अस्ति तथा च अस्य ग्रन्थस्य व्याकरणशास्त्रे कियत् योगदाम् अस्ति। यस्य लाभः पाठकानां कृते ग्रन्थम् अवगमनाय भविष्यति। तथा च उत्तरवर्ती शोधार्थिनां कृते पाथेयः भविष्यति। पूर्णविश्वासमस्ति यत् विद्वज्जनानां मध्ये इदं कार्यं अवश्यमेव रुचिकरं भविष्यति। अतः आशास्ति विद्वज्जनैः द्वारा एतस्य शोधकार्यस्य कृते अवश्यमेव स्वीकृतिः भविष्यति।

अध्याय विभाजनम्

- **प्राक्कथनम्**

प्रथमोऽध्यायः– अध्येयग्रन्थस्य सामान्यपरिचयः

(क) कथासाहित्यस्य उद्भवः विकासश्च।

(ख) व्याकरणशास्त्रस्य उद्भवः विकासश्च।

(ग) धातूनां परिचयः।

(घ) ग्रन्थग्रन्थकारयोः परिचयः।

द्वितीयोऽध्यायः – गणानां विवेचनम्

(क) गणानां परिचयः तद् वैशिष्ट्यञ्च।

(ख) अध्येयग्रन्थे गणीयप्रयोगवैशिष्ट्यम्।

तृतीयोऽध्याय– प्रक्रियाणां विवेचनं तद् वैशिष्ट्यञ्च

(क) प्रक्रियाणां परिचयः।

(ख) अध्येयग्रन्थे प्रक्रियाणां विश्लेषणं तद् वैशिष्ट्यञ्च।

चतुर्थोऽध्यायः– पद–वाच्य–लकारार्थानां विवेचनं तद् वैशिष्ट्यञ्च

(क) पदानां परिचयः।

(ख) अध्येयग्रन्थे पदानां विश्लेषणं तद् वैशिष्ट्यञ्च।

(ग) वाच्यानां परिचयः।

(घ) अध्येयग्रन्थे वाच्यानां विश्लेषणं तद् वैशिष्ट्यञ्च।

(ङ) लकारार्थानां परिचयः।

(च) अध्येयग्रन्थे लकारार्थानां विश्लेषणं तद् वैशिष्ट्यञ्च।

पंचमोऽध्यायः– कृदन्तानां पदानां विवेचनं तद् वैशिष्ट्यञ्च

(क) कृदन्तपदानां परिचयः।

(ख) अध्येयग्रन्थे कृदन्तपदानां विश्लेषणं तद् वैशिष्ट्यञ्च।

षष्ठोऽध्यायः – कौमुदीकथाकल्लोलिन्याःप्रभावः

(क) पूर्ववर्ती प्रभावः

(ख) उत्तरवर्ती प्रभावः

(ग) ग्रन्थस्य व्याकरणशास्त्रे योगदानम्।

सप्तमोऽध्याय – कौमुदीकथाकल्लोलिन्याः भाषावैशिष्ट्यम्।

(क) भाषाविज्ञान–दृष्ट्या।

(ख) साहित्यिकदृष्ट्या।

(ग) व्याकरणिकप्रयोगद्वारा अभिव्यक्तिसौन्दर्यम्।

उपसंहारः–

सन्दर्भ ग्रन्थ सूची

सन्दर्भ ग्रन्थ सूची

1. अनुसन्धान परिचय – अग्रवाल, पारसनाथ, लक्ष्मीनारायण, 1973
2. अष्टाध्यायी – (अनुवृत्ति–वृत्ति–उदाहरण–वार्तिक–गणपाठादिसूचीसहिता) अभिमन्यु, प्रतिभा प्रकाशन, दिल्ली 2011
3. आधुनिक काल का संस्कृत गद्य इतिहास – शास्त्री, कलानाथ, राष्ट्रीयसंस्कृतसंस्थान, 1995
4. आधुनिक शोध प्रणाली – मिश्र, महेन्द्र कुमार, मार्क पब्लिशर्स, जयपुर 2009
5. आधुनिक संस्कृत साहित्य का इतिहास – उपाध्याय, बलदेव उ.प्र. संस्कृत संस्थान, लखनऊ 2000 ई.
6. काशिका–वेदालंकार, रघुवीर, चौखम्बा ओरियन्टालिया, दिल्ली, प्रथम भाग–2006 द्वितीय भाग–2010
7. कौमुदीकथाकल्लोलिनी – शास्त्री रामशरण, चौखम्बा विद्याभवन वाराणसी, प्रथम संस्करण सं. 2017
8. नीतिकथा का उद्भव एवं विकास – कवठेकर, प्रभाकरण नारायण।
9. पाणिनीय प्रबोधः – शास्त्री, श्रीगोपाल, दर्शन केसरिविरचितः सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः, वाराणसी।
10. महाभाष्यम् (प्रदीपोद्योतभासितम्) – पतंजलिः, सम्पादक शास्त्री भार्गव, चौखम्बा संस्कृत प्रतिष्ठान्, जवाहरनगर, दिल्ली 1988
11. सिद्धान्त कौमुदी – पाण्डेय, उमेशचन्द्र, चौखम्बा विद्याभवन, वाराणसी।
12. संस्कृतवाङमय का वृहद् इतिहास–पाण्डेय, ओमप्रकाश, उ०प्र० संस्कृत संस्थान, लखनऊ, 1997
13. संस्कृतव्याकरण का उद्भव और विकास वर्मा, सत्यकाम, मोतीलाल बनारसीदास, दिल्ली, 1991
14. संस्कृतव्याकरण शास्त्र का इतिहास– मीमांसक, युधिष्ठिर, रामलाल कपूर ट्रस्ट सोनीपत, हरियाणा, 1994

कोषग्रन्थाः

1. अमरकोष — अमरसिंह, चौखम्बा विद्याभवन, चौक बैंक ऑफ बड़ौदा भवन के पीछे।

2. पारिजात कोश — शर्मा, ईश्वरचन्द्र, परिमल पब्लिकेशन, दिल्ली, 2004

3. शब्दकल्पद्रुम — देव, राजा राधाकान्त चौखम्बा संस्कृत सीरीज, वाराणसी, 1967

4. संस्कृत हिन्दी कोश — आप्टे, वामन शिवराम मोतीलाल बनारसीदास पब्लिशर्स, दिल्ली, इलाहाबाद, 1966—69

5. संस्कृत शब्दार्थ कौस्तुभ — शर्मा द्वारिकाप्रसाद चतुर्वेदी, इलाहाबाद, 1957

6.. संस्कृत साहित्य कोश — सोमवाल, श्रीकृष्ण, दिल्ली संस्कृत— अकादमी, 1996